ह्नू च कृशरोमगे। सुदृक्काकृतयः पादा डिम्बद्ब्यपि विश्रुतः। आस्यौष्ठतालुरसनाः काल कल्माषकान्तयः। कर्णौ कचाचितौ न्यूनौ ताम्रवर्णस्य बालधिः। कराभिप्रेषणासक्तौ मानोनाङ्गुलिपुष्कले। स्थूले च पक्ष्मणी नेत्रप्रभे दुष्प्रेक्षणे तथा। दुर्बद्धानि तथाङ्गानि बलीमुखनिभं मुखम्। रेणुद्विरेफानुरूपा मक्षिकाभिश्रिताकृतिः। अरत्निमानौ दन्तौ च शुष्कावथ्यनिगूहितौ। कर्णौ च कठिने यस्य नीलगोपक विद्युति। विवर्णं कठिनं रूक्षं भिन्नमिश्रतनुरुहम्। नपुंसकस्य मातङ्गो स दूरे त्यागमर्हति। मञ्जिष्ठारागभावेन यत्तनुर्वानरोपमा। स पूतनोऽग्निभयदो यूथहा परिवर्ज्जितः। तिर्य्यक्प्रेक्षी चाधःप्रेक्षी दुर्गन्धमदसंयुतः। कालपिङ्गोदरोनेष्टो मातङ्गः स्यात् मतङ्गजः। पुष्करे स्तनमध्ये च वामहस्ते मतङ्गजः। किलासैरावृतः स्याच्च तद्राष्ट्रं दुर्नयं दिशेत्। पश्चात्समुत्थितावापो नित्यमीलितलोचनः। बाहित्थसंक्षिप्तमुखो निबद्धाक्षो मतङ्गजः। न्यूनं विंशतिवर्षस्य दन्तौ यस्य प्रमाणतः। अतिमात्रौ न वै स्यातां नागो नागसमस्तु सः। हीनातिरिक्तदशनो यस्य वै तस्य स्त्युदः” इत्यवयवदोषाः।

“अथ वर्णास्तथावर्त्ताः पुष्पाण्याभा स्वरोगतिः। बलं सत्वमनूकञ्च गन्धोबोधितमिङ्गितम्। स्याद्भूतगुणवैशेष्याद् वर्णवैशेष्यमेव हि। वातादिभ्योऽपि दोषेभ्योवर्णवैशेष्यमिष्यते। रौक्ष्यं परातिरेकेण सर्वं वातस्य वै भवेत्। सोष्मता शोणितात्, पित्तात् रौद्रता, सौम्यतेन्दुजा” इत्युपक्रम्य “कफो गर्भशयानस्य स्निग्धतां प्रतिपद्यते। पित्तं गर्भशयानस्य स्तब्धत्वं प्रतिपद्यते। तत्करी कथितः कालस्तथैव स्निग्धदर्शनः। पित्तं कफस्य युगपद् वेविष्टि तु ततस्ततः। श्यामवर्णोऽपि मातङ्गो जायते स्निग्धएव वै। गर्भे च मांससहिते कफरक्ते यदा स्थिते। चिरं गर्भशयानस्य हरिस्निग्धस्ततोऽप्यसौ। रक्तपित्तकफानाञ्च सङ्करत्वगतौ तथा। हरितारुणपीताद्या नानावर्णा भवन्ति हि। सर्वत्रानुगवातेन मीलनाद्रूक्षता भवेत्। पारुष्यं धूसरत्वं च सुस्निग्धत्वं भवेत्तथा। क्वचिद्वर्णविभेदाश्च पूर्वसम्भवकारणात्। ग्रहनक्षत्रचाराच्च पितृबीजवशात्तथा। तत्रापि श्वेतवर्णाश्च शुक्रवर्हिमणित्विषः। शुद्धहेमरुचश्चाभाः सुरेषु प्राचि च क्वचित्। नृणान्तु हरयः कृष्णाः श्यामाश्च करिणः स्मृताः। हरिर्मधुसवर्णश्च कृष्णश्चाञ्जनसन्निभः। न कालो न हरिर्नागोमध्वाभः श्याम इष्यते। एतेषु त्रिषु वर्णेषु हरिवर्णोवरोमतः”। इति वर्णभेदकारणादिनिरूपणम्।

“आवर्त्तः षड्विधश्चैव त्वग्जोदशनभङ्गजः। कोषजः पक्ष्मजातश्च बालजो रोमजोऽपि च। कोषरोमभवौ शस्तौ दन्तकल्पनजः शुभः। शोकानर्थप्रदाः प्रोक्तास्त्वग्जपक्ष्मजबालजाः। भूमिदो रोमजावर्त्तः कोषावर्त्तो जयप्रदः। दशनसम्भवावर्त्तः सुतदारप्रदस्तथा। कथितः पक्ष्मजावर्त्तो ज्ञातिजातभयप्रदः। व्रणकङ्कालजावर्त्तः सामहा रोमसम्भवः। प्रशस्तो दक्षिणावर्त्तो वामावर्त्तो विगर्हितः। मतो व्यक्तो मृदुस्निग्धः सवर्णः पीतरोमजः। वामाङ्गे दक्षिणावर्त्तो वामावर्त्तश्च दक्षिणे। आवर्त्तः सम्मतोऽभीष्टो द्विजराजसमप्रभः। शुभोऽप्यक्षेत्रजातोऽसौ शुभं नैव प्रयच्छति। अशुभक्षेत्रजातश्च नानिष्टफलदः शुभः। अवग्रहे ग्रहतले स्तनयोरन्तरे तथा। ग्रीवाया मक्षिकूटोर्द्ध्वं कुम्भयोरन्तरे तथा। उत्तले दन्तवेष्टे च कर्णमध्ये च वक्षसि। आवर्त्ता वारणानां हि सुनिश्रेयाः शुभप्रदाः। स्तनान्तरे शिरोमध्ये कुम्भान्तश्चूलिकान्तरे। वक्षस्यावर्त्तसम्पन्नः कुञ्जरः पञ्चमङ्गलः। शीर्षावर्त्तोऽभिषेकाय स्तनावर्त्तो जयाय च। सुखाय चूलिकावर्त्तः कुम्भोरोरोमजः श्रिये। वंशे प्रोहेऽथ बाहित्थे मन्यायां मगदे कटे। कर्णेऽक्षिकूटे नाभौ च कक्षपक्ष्मांसकुक्षिषु। बालधौ पेचके मेढ्रे रन्ध्रसन्धिकलासु च। आवर्त्ता न प्रशस्यन्ते कर्णभागगताश्च ये। कोणप्रमाणलघवोमर्म्मपर्वप्रदेशगाः। अशुभक्षेत्रजाताश्च सकिलासान्तरोत्थिताः। मनोनेत्राभिरामो हि सुस्रक्ष्णोगदितो महान्। ऊर्द्ध्वप्रवृत्तोदीर्घश्च रोमजोऽर्थजयावहः। मर्म्मभागेषु नागस्य निष्ठास्ते रोमजादयः। समभागगतावर्त्ताः सर्व्वतः सुखदा मताः”। इत्यावर्त्तः।

“स्वस्तिकादिसुसंस्थानं पुष्पं दशनदेहजम्। स्निग्धं भवेत् शुभच्छायमच्छिन्नं वाञ्छितप्रदम्। कबन्धादिकसंस्थानं विषतन्तुसमं स्फुटम्। रूक्षं कृष्णञ्च कुसुमं तातानर्थकसंज्ञकम्। दद्यात् सुतं सितं पुष्पं स्निग्धपीतञ्च हेमदम्। नीलोत्पलाभं शीलाभ्रं स्निग्धकालञ्च वृत्तिदम्। यदि स्यात् पूजिते भागे कुसुमं स्निग्धपाण्डुरम्। सुरचापसमाकारं तद्भवेद्भूभुजः शुभम्। शक्रचापनिभं पुष्पं दन्तोपरि च दन्तिनः। दिशेदिष्टं सुभिक्षं च क्षेमं च क्षितिरक्षिणः। स्तनान्तः स्निग्धरूक्षे च पुष्पे नागसमे तथा। पुष्पे श्रोत्रान्तःकाले चक्षान्निरुद्धिं विनिर्दिशेत्। श्रीवृक्षादिनिभाकारे वैजयन्तीध्वजोपमे। शैलप्रा-